पलाशकुसुमाभासं तथा पाटलसन्निभम् ।
वैश्यजातिर्भवेत् स्निग्धं वर्णाढ्यं मन्दकान्तिभम् ॥
रक्तोत्पलदलाकारं कठिनं न चिरद्युति ।
विद्रुमं शूद्रजातिः स्याद्दाशुवेध्यं तथैव च ॥*॥
रक्तता स्निग्धता दार्ढ्यं चिरद्युतिः सुवर्णता ।
प्रवालानां गुणाः प्रोक्ता धनधान्यकराः पराः ॥
हिमाद्रौ यत्तु संजातं तद्रक्ततमतिनिष्ठुरम् ।
तत्र लिप्तो भवेन्निम्बरुक्षोऽतिमधुरः स्थितः ।
तस्य धारणमात्रेण विषवेगः प्रशाम्यति ॥*॥
विवर्णता तु खरता प्रवाले दूषणद्वयम् ।
रेखाकाकपदौ बिन्दुर्यथा वज्रेषु दोषकृत् ।
तथा प्रवाले सर्व्वत्र वर्जनीयं विचक्षणैः ॥
रेखा हन्याद्यशो लक्ष्मीमावर्त्तः कुलनाशनः ।
पद्गलो रोगकृत् ख्यातो बिन्दुर्धनविनाशकृत् ॥
त्रासः संजनयेत्त्रासं नीलिका मृत्युकारिणी ।
मूल्यं शुद्धप्रवालस्य रूप्यद्विगुणमुच्यते ॥
धारणेऽस्यापि नियमो जातिभेदेन पूर्व्ववत् ॥"*॥
तथाहि ।
"विरूपजातिं विषमं विवर्णं
खरप्रवालं प्रवहन्ति ये ये ।
ते मृत्युमेवात्मनि वै वहन्ति
सत्यं वदत्येव कृती मुनीन्द्रः ॥"
इति युक्तिकल्पतरौ प्रवालपरीक्षा ॥*॥
(अस्य संशोधनादिकं यथा,—
"कुमार्य्या तण्डुलीयेन तुल्येन च निषेचयेत् ।
प्रत्येकं सप्तवारांश्च तप्ततप्तानि कृत्स्नशः ॥
मौक्तिकानि प्रवालानि तथा रत्नान्यशेषतः ।
चणादिविधवर्णानि म्रियन्ते नात्र संशयः ॥
क्षीरदुग्धेन प्रवालञ्च भावयित्वा तु हण्डिके ।
मध्येऽपि तत्क्षहितं स्थापयेत्तन्निरोधयेत् ।
चुल्लामग्निप्रतापेन म्रियते प्रहरद्वये ॥
इति प्रवालमारणम् ॥"
इति वैद्यकरसेन्द्रसारसंग्रहे जारणमारणाधिकारे ।)
किशलयः । (यथा, कुमारे । १ । ४४ ।
"पुष्पं प्रवालोपहितं यदि स्यात्
मुक्ताफलं वा स्फुटविद्रुमस्थम् ।
ततोऽनुकुर्य्याद्विशदस्य तस्या-
स्ताम्रौष्ठपर्य्यस्तरुचः स्मितस्य ॥")
वीणादण्डः । इति मेदिनी । ले, १०७ ॥
प्रवालफलं, क्ली, (प्रवालवद्रक्तं फलं यस्य ।) रक्त-
चन्दनम् । इति भावप्रकाशः ॥
प्रवालिकः, पुं, (प्रवालोऽस्त्यस्य बाहुल्येनेति । प्रवाल
+"अत इनिठनौ ।" ५ । २ । ११५ । इति
ठन् ।) जीवशाकः । इति राजनिर्घण्टः ॥
प्रबाहुः, पुं, (प्रगतो बाहुमिति ।) कूर्परस्याधो-
भागः । यथा, विष्णुपुराणे ५ । ५ । १६ ।
"सुखं बाहुप्रबाहू च मनः सर्व्वेन्द्रियाणि च ।
रक्षत्वव्याहतैश्वर्य्यस्तव नारायणोऽव्ययः ॥"
प्रबाहुकम्, व्य, समानकाले । ऊर्द्ध्वे । प्रवाहिकेति
पाठान्तरम् । इति कौमुदीटीका तत्त्वबोधिनी ॥
प्रबुद्धः, त्रि, (प्र + बुध + क्तः ।) पण्डितः । प्रफुल्लः ।
इति हेमचन्द्रः ॥ (यथा, रघुः । १० । ६ ।
"प्रबुद्धपुण्डरीकाक्षं बालातपनिभांशुकम् ।
दिवसं शारदमिव प्रारम्भसुखदर्शनम् ॥")
जागरितः । यथा, भट्टिः । ४ । १४ ।
"प्रातस्तरां पतत्त्रिभ्यः प्रबुद्धः प्रणमन्रविम् ॥"
प्रबोधः, पुं, (प्र + बुधौ ङ अपगमे + भावे
घञ् ।) विनिद्रत्वम् । इति हेमचन्द्रः ॥ (यथा,
मार्कण्डेये । ८१ । ६७ ।
"प्रबोधञ्च जगत्स्वामी नीयतामच्युतो लघु ।
बोधश्च क्रियतामस्य हन्तुमेतौ महासुरौ ॥")
प्रकृष्टज्ञानञ्च । यथा,—
"तावत् सत्यं जगद्भाति प्रबोधे सत्यसद्भवेत् ॥"
इत्यात्मबोधग्रन्थः ॥
(यथा च रघुः । ५ । ६५ ।
"सूतात्मजाः सवयसः प्रथितप्रबोधं
प्राबोधयन्नुषसि वाग्भिरुदारवाचः ॥")
प्रबोधनं, क्ली, (प्र + बुध + ल्युट् ।) न्यूनपूर्व्व-
गन्धस्य चन्दनादेः प्रयत्नविशेषेण पुनः पूर्व्व-
सौगन्ध्योत्पादनम् । तत्पर्य्यायः । अनुबोधः २ ।
इत्यमरभरतौ । बोधजननञ्च ॥ (जागरणम् ।
यथा, हरिवंशे । १७१ । ७१ ।
"ततस्तूर्य्यनिनादैश्च शङ्खानाञ्च महास्वनैः ।
प्रबोधनं महाबाहोः कृष्णस्याक्रियतालये ॥"
विकाशः । यथा, पञ्चतन्त्रे कथामुखे ।
"तदेतेषां बुद्धिप्रबोधनं यथा भवति तथा
केनाप्युपायेनानुष्ठीयतामिति ॥" तथा च ऋतु-
संहारे । ५ । १० ।
"सुगन्धिनिःश्वासविकम्पितोत्पलं
मनोहरं कामरतिप्रबोधनम् ॥")
प्रबोधनी, स्त्री, (प्रबोध्यतेऽनयेति । प्र + बुध +
णिच् + ल्युट् + ङीप् ।) दुरालभा । इति राज-
निर्घण्टः ॥ (प्रबुध्यते हरिरस्यामिति ।) श्रीहरे-
रुत्थानैकादश्यादिः ।
अथ प्रबोधनीकृत्यम् ।
"शयन्यामिव कृत्यास्यां क्षीराम्भोधिमहोत्सवम् ।
प्रबोध्य कृष्णं संपूज्य विधिनारोहयेद्रथम् ॥"
अथ प्रबोधनीकृत्यनियता ।
स्कान्दे तत्रैव ।
"जन्मप्रभृति यत् पुण्यं नरेणोपार्जितं भुवि ।
वृथा भवति तत्सर्व्वं न कृत्वा बोधवासरम् ॥"
अथ प्रबोधनीमाहात्म्यम् । तत्रैव ।
"प्रबोधन्याश्च माहात्म्यं पापघ्नं पुण्यवर्द्धनम् ।
मुक्तिदं कृतबुद्धीनां शृणुष्व त्वं मुनिसत्तम ! ॥
तावद्गर्जति विप्रेन्द्र ! गङ्गा भागीरथी क्षितौ ।
यावन्नायाति पापघ्नी कार्त्तिके हरिबोधनी ॥
तावद्गर्जन्ति तीर्थानि आसमुद्रसरांसि च ।
यावत् प्रबोधनी विष्णोस्तिथिर्नायाति कार्त्तिके ॥
वाजपेयसहस्राणि अश्वमेधशतानि च ।
एकेनैवोपवासेन प्रबोधन्यां लभेन्नरः ॥
दुर्लभञ्चैव दुष्प्राप्यं त्रैलोक्ये सचराचरे ।
तदपि प्रार्थितं विप्र ! ददाति हरिबोधनी ॥
ऐश्वर्य्यं सन्ततिं प्रज्ञां राज्यञ्च सुखसम्पदः ।
ददात्युपोषिता विप्र ! हेलया हरिबोधनी ॥
मेरुमन्दरतुल्यानि पापान्यतुर्ज्जितान्यपि ।
एकेनैवोपवासेन दहते हरिबोधनी ॥
पृथिव्यां यानि दानानि दत्त्वा यत् फलमाप्नुते ।
एकेनैवोपवासेन ददाति हरिबोधनी ॥"
किञ्च ।
"जातः स एव सुकृती कुलं तेनैव पावितम् ।
कार्त्तिके मुनिशार्दूल ! कृता येन प्रबोधनी ॥
यानि कानि च तीर्थानि त्रैलोक्ये सम्भवन्ति च ।
तानि तस्य गृहे सम्यक् यः करोति प्रबोधनीम् ॥
सर्व्वं कृत्यं परित्यज्य तुष्ट्यर्थं चक्रपाणिनः ।
उपोष्यैकादशी सम्यक् कार्त्तिके हरिबोधनी ॥
किं तस्य बहुभिः कृत्यैः परलोकप्रदैर्मुने ! ।
सकृच्चोपोषिता येन कार्त्तिके हरिबोधनी ॥
स ज्ञानी स हि योगी च स तपस्वी जिते-
न्द्रियः ।
स्वर्गमोक्षौ च तस्यास्तामुपास्ते हरिबोधनीम् ॥
विष्णोः प्रियतमा ह्येषा धर्म्मसारस्य दायिनी ।
इमां सकृदुपोष्यैव मुक्तिभागी भवेन्नरः ॥
प्रबोधनीमुपोष्यैव न गर्भे विशते नरः ।
सर्व्वधर्म्मान् परित्यज्य तस्मात् कुर्व्वीत नारद ! ॥
स्नानं दानं तपो होमः समुद्दिश्य जनार्द्दनम् ।
नरैर्यत् क्रियते विप्र ! प्रबोधन्यां तदक्षयम् ।
महाव्रतमिदं पुत्त्र ! महापापौघनाशनम् ।
प्रबोधवासरं विष्णोर्विधिवत् समुपोषयेत् ॥
व्रतेनानेन देवेशं परितोष्य जनार्द्दनम् ।
विराजयन् दिशो दीप्त्या प्रयाति भुवनं हरेः ॥"
पाद्मे च तत्रैव ।
"दुग्धाब्धिभोगिशयने भगवाननन्तो
यस्मिन्दिने स्वपिति चाथ विबुध्यते च ।
तस्मिन्ननन्यमनसामुपवासभाजां
पुंसां ददात्यभिमतं गरुडाङ्कशायी ॥"
वाराहे च ।
"उपवासासमर्थानां सदैव पृथुलोचने ! ।
एका सा द्वादशी पुण्या समुपोष्या प्रबोधनी ॥
तस्यामाराध्य विश्वेशं जगतामीश्वरेश्वरम् ।
प्राप्नोति सकलं तद्धि द्वादशद्वादशीव्रतम् ॥
उत्तराङ्गारकयुता यदि सा भवति प्रिये ! ।
तदा सा महती पुण्या कोटिकोटिगुणोत्तरा ॥
शयने बोधने चैव कटिदाने च सुन्दरि ! ।
उपोष्यैव विधानेन यान्ति मल्लयतां नराः ॥
एकादशी सोमयुता कार्त्तिके मासि भाविनि !
उत्तराभाद्रसंयोगे अनन्ता सा प्रकीर्त्तिता ॥
तस्यां यत् क्रियते भद्रे ! सर्व्वमानन्त्यमश्नुते ।
अनन्तपुण्यफलदा तेनानन्ता स्मृता फले ॥"
तत्रैव श्रीयमनारदसंवादे ।
"अन्यच्च ते प्रवक्ष्यामि गुह्याद्गुह्यतरं मुने ! ।
कार्त्तिकेऽमलपक्षे तु याच्चादेकादशी स्मृता ॥
भक्तिप्रदा हरेः सा तु नाम्ना ख्याता प्रबोधनी ।
या सा विष्णोः परा मूर्त्तिरव्यक्तानेकरूपिणी ॥
सा क्षिप्ता मानुषे लोके द्वादशी मुनिपुङ्गव ! ॥"
श्रीमथुरायाञ्च विशेषतः पाद्मे तत्रैव ।
"तावद्गर्ज्जन्ति तीर्थानि वाजिमेधादयो मखाः ।